नासीरः' इत्यमरः । विंशतिविधवीक्षणानां विंशतिसंख्याककरुणाकटाक्षवीक्षणानाम् । न तु कियतामेवेति भावः । तथापि क्षणमात्रमल्पकालमेव पात्रं योग्यो भवति । 'मात्रं कात्स्न्र्येऽवधारणे,' 'योग्यभाजनयोः पात्रम्' इति चामरः । शुनासीरचिरकाङ्क्षितानामिल्लनेन पाकशासनस्य कारागृहप्रवेशेन दुःखं ब्रह्मवाक्येन मोचनं च सूचितं भवति ॥

अथ मारुतावस्थां विज्ञापयति—

**तेन पुलस्त्यनन्दनेन संक्रन्दननन्दना[1]त्स्वमन्दिरोद्यानमानीतस्य मन्दारप्रमुखस्य वृन्दारकतरुवृन्दस्य वन्दीकृतसुरसुन्दरीनयनेन्दीवर[2]द्वन्द्वाच्च करारविन्दकलितकनककलशाच्च मन्दोष्णं [3]स्यन्दमानैरम्बुभिर्जम्बालितालवालस्य पचेलिमानामपि कुसुमानां पतनभयमाशङ्कमानाः पवमानाः [4]परिस्पन्दितुमपि प्रभवो न भवन्ति ।**

**तेनेति** । पुलस्त्यनन्दनेन विश्रवसः पुत्रेण तेन रावणेन संक्रन्दननन्दनादिन्द्रोद्यानात् । उद्धृत्येति शेषः । स्वमन्दिरोद्यानं निजगृहाराममानीतस्य प्रापितस्य । निजाशोकवनिकायां प्रत्यारोपितस्येत्यर्थः । तथा वन्दीकृता उपगृहीकृताः । कारागृहनिक्षिप्ता इत्यर्थः । 'प्रग्रहोपग्रहौ वन्द्याम्' इत्यमरः । तासां सुरसुन्दरीणां देवतास्त्रीणां नयनेन्दीवरद्वन्द्वान्नेत्रोत्पलयुगलाच्च । करारविन्देषु तासामेव हस्तपद्मेषु कलितो यः कनककलशो हिरण्मयवारिकुम्भस्तस्माच्च । उभयत्रापि जातावेकवचनम् । नयनारविन्दद्वन्द्वेभ्यः कनककलशेभ्यश्चेत्यर्थः । तासामारामतरुमूलसेकव्यापारे नियोजितत्वादिति भावः । मन्दोष्णमीषदुष्णं यथा तथा स्यन्दमानैः प्रस्रवद्भिरम्बुभिः । बाष्पोदकैः कलशोदकैश्चेत्यर्थः । कलशोदकानां शीतलत्वेऽपि शोकानलसंतप्तबाष्पोदकमिश्रणान्मन्दोष्णमित्युक्तमित्यवगन्तव्यम् । जम्बालवत्कृतानि जम्बालितानि । पङ्कीकृतानीत्यर्थः । 'तत्करोति—'इति ण्यन्तात्कर्मणि क्तः । तान्यालवालानि जलाधारमूलवलयानि यस्य तस्य । 'निषद्वरस्तु जम्बालः' इति, 'स्यादालवालमावालम्' इति चामरः । मन्दारप्रमुखस्य वृन्दारकतरुवृन्दस्य पारिजातादिसुरतरुनिकरस्य संबन्धिनाम् । स्वयमेव पच्यन्त इति पचेलिमानि । पतनोन्मुखानीत्यर्थः । कर्मकर्तरि केलिमर्वाच्यः । तेषामपि कुसुमानां पतनभयमाशङ्कमाना अधःपातमुत्प्रेक्षमाणाः । तथा सति कुसुमानां पङ्कलेपमहापराधेन निगृह्णीयादिति भावः । पवमाना मरुतः परिस्पन्दितुं चलितुमपि । किमुत यथेच्छं विहर्तुमिति भावः । प्रभवः समर्था न भवन्ति ॥

अथाग्न्यवस्थां निवेदयति—

**एतेऽपि पावका रूढि[5]शङ्कावहां हुतवहाख्यां वहन्तस्तद्गृहे गार्हपत्य[6]पुरोगाः पौरो[7]गवधुरं [8]दधते ।**

१. 'नन्दनवनात्' इति पाठः. २. 'द्वन्द्वात्तत्करारविन्दकनक' इति पाठः. ३. 'स्पन्दमानैः' इति पाठः. ४. 'संततं परिस्पन्दितुं' इति पाठः. ५. 'शङ्कां' इति पाठः. ६. 'पुरःसराः' इति पाठः. ७. 'पौरोगवीं धुरं' इति पाठः. ८. 'दधति' इति पाठः.

**एत इति ।** गार्हपत्यं पुरोगोऽग्रेसरो येषां ते तथोक्ता एते परिदृश्यमानाः पावका गार्हपत्याहवनीयदक्षिणान्वाहार्यावसथ्यादिरूपा अग्नयोऽपि । रूढिरश्वकर्णादिवदवयवार्थाभावेन समुदायप्रसिद्धिः । तदुक्तमाचार्यैः—'असत्स्ववयवार्थेषु योऽन्यत्रार्थे प्रयुज्यते । तत्रानन्यगतित्वेन समुदायः प्रसिध्यति ॥' इति । तच्छङ्कावहां तद्गोचरबुद्धिजननीं हुतवहाख्यां हुतवहाभिधानं वहन्तः सन्तः । पूर्वं हुतं यजमानैर्हूयमानं हविर्वहन्तीति हुतवहा इति योगसिद्धेर्व्याख्या तामेवेदानीं लोकविद्विष्टकर्मणा रावणेनाध्वराणां विध्वंसितत्वाद्धविषामलाभेन तादृक्शङ्कावहां दधाना इत्यर्थः । तद्गृहे रावणमन्दिरे पौरोगवधुरं महानसाध्यक्षाधिकारं दधते धारयन्ति । 'समानौ रसवत्यां तु पाकस्थानमहानसे । पौरोगवस्तदध्यक्षः' इत्यमरः ॥

सर्वज्ञस्य भगवतः पुरस्तात्किमवस्थान्तरं विज्ञापनीयमिति गमयन्ति—

**किं बहुना ।**

**किं बहुनेत्यादिना ।** बहुभिः कालयापनकरैर्वाक्यैरलमित्यर्थः ॥

किंतु वक्तव्यांशमेव विज्ञापयाम इत्यत आह—

**स एष मानुपादवमाननमागमिष्यतीत्यमन्वानस्तदितरैरवध्यत्वं चतुराननवराल्लब्ध्वा समुद्धतः संप्रति संप्रहारसमाक्रान्तदिगन्तदन्तावलदन्तकुन्तव्रणकिणस्थपुटितवक्षःस्थलः स्थलकमलिनीं वनवारण इव रावणस्त्रिलोकीमभिभवन्भवदीयानित्यस्मान्न जातु किंचिदपि जानातीति ।**

**स इति ।** स एष रावणः । मानुषात् । मनुष्येभ्य इत्यर्थः । जातावेकवचनम् । अवमाननम् । अवज्ञापरिभव इति यावत् । 'रीढावमाननावज्ञावहेलनम्' इत्यमरः । आगमिष्यति समापतेदित्येवममन्वानोऽनवबुध्यमानः । तेषां तृणप्रायत्वादिति भावः । तदितरैः सुरासुरादिभिरवध्यत्वमहिंस्यत्वं चतुराननवराल्लब्ध्वा प्राप्य । अत एव समुद्धतो दर्पोद्रिक्तः सन् । संप्रतीदानीम् । संप्रह्रियतेऽनेनेति संप्रहारो युद्धम् । 'संप्रहाराभिसंपातकलिसंस्फोटसंयुगाः' इति पर्यायेष्वमरः । तत्र समाक्रान्ताः समवरुद्धा ये दिगन्तदन्तावला ऐरावतादिदिग्गजास्तेषां दन्ता रदना एव कुन्ताः प्रासास्तैर्यानि व्रणानि क्षतानि तैर्जाता ये किणाः शुष्कग्रन्थयः । 'तृतीया तत्कृत—' इत्यादिना समासः । तैः स्थपुटितं निम्नोन्नतं वक्षःस्थलमुरःस्थलं यस्य तथोक्तः सन् । अत एव वनवारणो वनगजः । वनग्रहणं निर्जलत्वद्योतनार्थम् । स्थलकमलिनीं स्थलप्ररूढपद्मिनीमिव । त्रयाणां लोकानां समाहारस्त्रिलोकी । 'तद्धितार्थोत्तरपदसमाहारे च' इति समासः । 'संख्यापूर्वो द्विगुः' इति द्विगुसंज्ञा । 'अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते' इति स्त्रीत्वम् । 'द्विगोः' इति ङीप् । 'द्विगुः—' इत्येकवचनम् । तां जगत्त्रयीमभिभवन्नाक्रमन् । पीडयन्नित्यर्थः । अस्मान्भवदीयांस्त्वावकीनान् । निग्रहानुग्रहसमर्थस्य भवतः संबन्धिन इत्यर्थः । जातु

1. 'मानवादवमानः' इति पाठः.

कदाचिदपि किंचिदीषदपि न जानाति। सकललोककण्टकेन दर्पान्धेन रावणेन त्वन्महिमैव न ज्ञायते। अस्माकं तु का कथेति भावः। इति विज्ञापयामासेति पूर्वेण संबन्धः॥

ततः किमत आह—

**अथ भगवानाकर्ण्य गीर्वाणगणवाणीम्।**

**अथेति**। अथ विज्ञापनानन्तरं भगवान्विष्णुः। भगवच्छब्दो व्याख्यातः। गीर्वाणगणस्येन्द्रादिसुरसङ्घस्य वाणीं वाचमाकर्ण्य श्रुत्वा॥

किमकरोदित्यत आह—

**इन्द्रनीलाचलोदञ्चच्चन्द्रिकाधवलस्मितः।**
**वाचमूचे सुधाधारां मधुरां मधुसूदनः॥ २२॥**

**इन्द्रनीलेति**। मधुं सूदयतीति मधुसूदनो विष्णुः। कर्तरि ल्युट्। अत्र मधुग्रहणं मध्वादिमहादैत्यसंहर्तुरस्य कियान्रावणवध इति द्योतयितुमित्यवगन्तव्यम्। इन्द्रनीलाचल इन्द्रनीलपर्वतः। इन्द्रनीललक्षणमुक्तम्। तत्रोदञ्चत्युल्लसन्ती या चन्द्रिका कौमुदी तद्वद्धवलं शुभ्रं स्मितं यस्य। स्मितपूर्वाभिभाषित्वात्कृतमन्दहासः सन्। यद्वा दुर्मदान्धोऽयं राक्षसभावाद्दुष्टनिग्रहशिष्टपरिपालनदक्षं मां ज्ञातुं न शक्नोतीति सावहेलनमन्दहासः सन्नित्यर्थः। अत्र मधुसूदनस्येन्द्रनीलसदृशाङ्गत्वाद्धासस्य च शुभ्रत्वेन कविसमयसिद्धत्वादियमुपमा। सुधाधाराममृतस्यन्दिनीमत एव मधुरां माधुर्यगुणयुक्ताम्। 'मधुरं रसवद्वाचि स्वादुन्यपि मधुस्त्रुति। येन माद्यन्ति विबुधा मधुनेव मधुव्रताः॥' इति वचनात्। वाचमूच उक्तवान्। श्लोकाख्यमेतदानुष्टुभं वृत्तम्। लक्षणं तूक्तम्। इदमुत्तरत्रापि द्रष्टव्यम्॥

वाचमेव विवृणोति—

**भवतामपराधविधायिनस्तस्य यातुधानस्य निधनमधुनैव विधातुं शक्यम्।**

**भवतामिति**। हे देवा इत्यध्याहर्तव्यम्। भवतां युष्माकमपराधविधायिन उक्तरीत्या अपकर्तुस्तस्य पूर्वोक्तस्य यातुधानस्य राक्षसस्य रावणस्य। 'यातुधानः पुण्यजनः' इति पर्यायेष्वमरः। निधनं विनाशमधुनैवेदानीमेव विधातुं कर्तुं शक्यं युक्तम्॥

तर्हीदानीमेव क्रियतामित्याशङ्क्य तत्रोपपत्तिमाह—

**किं तु सरसिजासनशासनमप्यमोघीकुर्वन्नुर्वीतले पुत्रीयतः सुत्राममित्रस्य दशरथस्य मनोरथमपि पूरयितुमादृतमानुषवेषः सन्नहमेव तं हनिष्यामीति व्याहृत्यान्तरधात्।**

१. 'विधायिनो यातुधानस्य तस्य' इति पाठः. २. 'वधिष्यामि' इति पाठः. ३ 'उक्त्वा' इति पाठः.